
त्रयोदशः पाठः

पृथिव्यां त्रीणि रत्नानि

0672CH13




पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥



पदच्छेदः – पृथिव्याम् त्रीणि रत्नानि जलम् अन्नम् सुभाषितम् मूढैः पाषाण-खण्डेषु रत्न-संज्ञा विधीयते।

अन्वयः – पृथिव्यां जलम् अन्नं सुभाषितम् (इति) त्रीणि रत्नानि (सन्ति)। मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

भावार्थः – पृथिव्यां त्रीणि रत्नानि सन्ति। तानि रत्नानि जलम् अन्नं सुभाषितं च भवन्ति। किन्तु मूर्खजनाः तु पाषाणखण्डान् रत्नानि इति वदन्ति।



अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

पदच्छेदः – अयम् निजः परः वा इति गणना लघुचेतसाम् उदारचरितानाम् तु वसुधा एव कुटुम्बकम्।


अन्वयः – अयं निजः परः वा इति गणना लघुचेतसां (जनानां भवति)। उदारचरितानां (जनानां) तु वसुधा एव कुटुम्बकम् (भवति)।

भावार्थः – एषः स्वजनः अस्ति, एषः च परः जनः अस्ति इति एतादृशं चिन्तनं तु सङ्कुचितभावयुक्तानां जनानां भवति। येषाम् उदारस्वभावः अस्ति तेषां कृते तु सम्पूर्णा पृथ्वी एव परिवारः भवति। सर्वे जनाः मम परिवारस्य सदस्याः सन्ति इति ते चिन्तयन्ति।

© NCERT not to be republished

Reprint 2026-27

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।




पदच्छेदः – उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

अन्वयः – कार्याणि उद्यमेन हि सिद्ध्यन्ति मनोरथैः न (सिद्ध्यन्ति)। (यथा) मृगाः (स्वयं) सुप्तस्य सिंहस्य मुखे न प्रविशन्ति।



भावार्थः – वयं यानि कार्याणि कुर्मः तानि केवलम् इच्छया न सिद्ध्यन्ति। कार्यस्य सिद्ध्यर्थं परिश्रमः तु आवश्यकः एव। सिंहः यद्यपि शक्तिमान् भवति तथापि आहारस्य कृते सः अपि परिश्रमं करोति। सुप्तस्य सिंहस्य मुखे मृगाः स्वयम् एव न प्रविशन्ति।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।



पदच्छेदः – अभिवादनशीलस्य नित्यम् वृद्धोपसेविनः चत्वारि तस्य वर्धन्ते आयुः विद्या यशः बलम्।


अन्वयः – तस्य नित्यम् अभिवादनशीलस्य वृद्धोपसेविनः आयुः विद्या यशः बलम् (च इति) चत्वारि वर्धन्ते।

भावार्थः – यः जनः सर्वदा वृद्धानां ज्येष्ठानां च सेवां सम्मानं च करोति, तथा च यः तान् सविनयं प्रणमति, तस्य जनस्य आयुः विद्या यशः बलं च वर्धन्ते।

© NCERT not to be republished

Reprint 2026-27

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥



पदच्छेदः – उद्यमः साहसम् धैर्यम् बुद्धिः शक्तिः पराक्रमः षड् एते यत्र वर्तन्ते तत्र देवः सहायकृत्।

अन्वयः – यत्र उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः च एते षड् वर्तन्ते तत्र देवः सहायकृत् (भवति)।

भावार्थः – यः जनः परिश्रमं करोति, साहसं करोति, धैर्यं धरति, बुद्धेः प्रयोगं करोति, बलशाली वर्तते, पराक्रमी च वर्तते, तस्य कार्ये परमेश्वरः अपि सहायतां करोति।

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्॥



पदच्छेदः – विद्या ददाति विनयम् विनयात् याति पात्रताम् पात्रत्वात् धनम् आप्नोति धनात् धर्मम् ततः सुखम्।

अन्वयः – विद्या विनयं ददाति, (मनुष्यः) विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मं ततः सुखम् (च आप्नोति)।

भावार्थः – विद्या विनयं ददाति, विनयकारणेन जनः योग्यतां प्राप्नोति, योग्यः जनः सरलतया धनम् अर्जयति, धनेन धर्मम् आचरति, धर्मस्य आचरणेन जनः सुखं प्राप्नोति, अतः विद्या अवश्यमेव सुखं ददाति।

© NCERT not to be republished

Reprint 2026-27


अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।



पदच्छेदः – अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी।

अन्वयः – हे लक्ष्मण! स्वर्णमयी अपि लङ्का मे (मह्यं) न रोचते। यतो हि जननी जन्मभूमिः च स्वर्गात् अपि गरीयसी (भवति)।

भावार्थः – श्रीरामः लक्ष्मणं कथयति यत् हे लक्ष्मण! यद्यपि लङ्का स्वर्णमयी अस्ति तथापि लङ्कायां निवासः न मह्यं रोचते, यतः जननी जन्मभूमिः च इति द्वयं स्वर्गात् अपि श्रेष्ठम् अस्ति। अतः मातृभूमौ निवासः उचितः।



पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्।।

पदच्छेदः – पुस्तकस्था तु या विद्या परहस्तगतम् धनम् कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्।

अन्वयः – पुस्तकस्था तु या विद्या (अस्ति), परहस्तगतं (च यद्) धनम् (अस्ति), (तद् उभयम् अपि) कार्यकाले समुत्पन्ने (सति) – न सा विद्या, न (च) तद् धनम् (स्वस्य उपयोगाय भवति)।

भावार्थः – कस्यचित् समीपे अनेकानि पुस्तकानि सन्ति किन्तु यदि तानि न कदापि पठितानि, तर्हि पुस्तके लिखितं ज्ञानं समागते अवसरे सहायकं न भवति, अपितु बुद्धिस्था विद्या एव कार्यं साधयति। एवमेव अन्येभ्यः प्रदत्तं धनम् अपि आवश्यक-समये सहायकं न भवति, स्वहस्ते यत् धनं भवति तदेव धनं कार्यं साधयति इति।



© NCERT not to be republished

Reprint 2026-27

वयं शब्दार्थान् जानीमः

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखन्तु
मूढैः	मूर्खजनैः	मूर्खों के द्वारा	By fools	
निजः	स्वकीयः	अपना	Own	
परः	अन्यः जनः	अन्य	Other	
लघुचेतसाम्	संकुचितहृदयानाम्	क्षुद्र हृदय वालों का	Of narrow-minded	
वसुधा	धरित्री	पृथ्वी	Earth	
उद्यमेन	परिश्रमेण	परिश्रम से	Effort	
वृद्धोपसेविनः	वृद्धानां सेवकस्य	बुजुर्गों की सेवा करने वाले का	Of the person who serves elders	
सहायकृत्	सहायकः	सहायता करने वाला	One who helps	
पात्रताम्	योग्यताम्	योग्यता को	Ability	
आप्नोति	प्राप्तं करोति	प्राप्त करता है	Receives	
गरीयसी	श्रेष्ठा	महान	Great	
परहस्तेषु	अन्येषां हस्तेषु	अन्यों के हाथ में	In others hand	



वयम् अभ्यासं कुर्मः

१. एतानि सर्वाणि सुभाषितानि उच्चैः पठन्तु स्मरन्तु लिखन्तु च।

२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—

(क) पृथिव्यां कति रत्नानि सन्ति? – .....

(ख) अयं निजः परो वा इति गणना केषां भवति? – .....

(ग) कार्याणि केन सिद्ध्यन्ति? – .....

(घ) विद्या किं ददाति? – .....

(ङ) जननी जन्मभूमिश्च कस्मात् गरीयसी? – .....

(च) लड्का कीदृशी आसीत्? – .....

© NCERT not to be republished

Reprint 2026-27

३. अधोलिखितानां प्रश्नानाम् एकवाक्येन उत्तराणि लिखन्तु—

(क) पृथिव्यां त्रीणि रत्नानि कानि सन्ति? .....

(ख) उदारचरितानां भावः कः भवति? .....

(ग) मृगाः स्वयमेव कस्य मुखे न प्रविशन्ति? .....

(घ) अभिवादनशीलस्य नित्यं कानि वर्धन्ते? .....

(ङ) मनुष्यः धनात् किम् आप्नोति? .....

(च) उत्पन्नेषु कार्येषु कीदृशं धनम् उपयोगाय न भवति? .....

४. चित्रं दृष्ट्वा वाक्यानि रचयन्तु—



उदाहरणम्– वृक्षः फलानि यच्छति। त्वं फलानि स्वीकरोषि। अहं फलानि स्वीकरोमि।

(क) ....

(ख) ....

(ग) ....

(घ) ....

(ङ) ....

© NCERT not to be republished

Reprint 2026-27

५. अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति लिखन्तु—

यथा – किं पृथिव्यां त्रीणि रत्नानि सन्ति ? ..... आम् .....

(क) त्रीणि रत्नानि जलम् अन्नं पाषाणः च सन्ति ? .....

(ख) किं धर्मेण सुखं प्राप्यते ? .....

(ग) किं विद्या विनयं ददाति ? .....

(घ) किम् अभिवादनशीलस्य विद्या वर्धते ? .....

(ङ) किम् उद्यमेन कार्याणि नश्यन्ति ? .....

(च) किं जन्मभूमिः स्वर्गात् गरीयसी भवति ? .....

६. चित्रे दर्शितस्य नाम लिङ्गं च निर्दिशन्तु—



..... पुष्पम् ..... – ..... नपुंसकलिङ्गम् .....



..... – .....




..... – .....



..... – .....



..... – .....




..... – .....

© NCERT not to be republished

Reprint 2026-27

७. वलये पदानि विलिख्य सुभाषितं पूरयन्तु—



८. पट्टिकातः पदानि चित्वा निर्देशानुसारं पदानि लिखन्तु—

जननी	धैर्यम्	विद्या	विनयः	निजः	पत्रम्	बुद्धिः
मूलम्	पराक्रमः	शक्तिः	धनम्	उद्यमः		

(क) प्रथमान्त-पुंलिङ्गपदानि सन्ति – 1. ..... उद्यमः ..... 2. .....
3. ..... 4. .....

(ख) प्रथमान्त-स्त्रीलिङ्गपदानि सन्ति – 1. ..... वसुधा ..... 2. .....
3. ..... 4. .....

(ग) प्रथमान्त-नपुंसकलिङ्गपदानि सन्ति – 1. ..... साहसम् ..... 2. .....
3. ..... 4. .....

९. पाठगतानि सुभाषितानि स्मृत्वा रिक्तस्थानानि पूरयन्तु—

(क) पृथिव्यां त्रीणि रत्नानि ..... सुभाषितम्।

(ख) उदारचरितानां तु ..... कुटुम्बकं भवति।

(ग) उद्यमेन हि ..... सिद्ध्यन्ति।

(घ) अभिवादनशीलस्य वृद्धोपसेविनः ..... वर्धन्ते।

© NCERT not to be republished

Reprint 2026-27

(ङ) उद्यमः ..... पराक्रमः।

(च) विद्या ..... ददाति।

(छ) जननी जन्मभूमिश्च ..... गरीयसी भवति।


१०. चित्राणि दृष्ट्वा उचितान् श्लोकांशान् लिखन्तु—





.....

.....







.....

.....

© NCERT not to be republished

Reprint 2026-27



योग्यताविस्तरः

एतानि सुभाषितानि विविधग्रन्थेभ्यः स्वीकृतानि सन्ति। तेषां ग्रन्थानां परिचयः अत्र वर्णितः अस्ति, यथा –

(क) चाणक्यनीतिः – एषः एकः नीतिग्रन्थः अस्ति। अस्य रचनाकारः चाणक्यः अस्ति। अस्मिन् ग्रन्थे सूत्ररूपेण धर्म-संस्कृति-न्यायव्यवस्था-शान्ति-सुशिक्षा-इत्यादीनां विषये सुन्दरं विवरणम् अस्ति।

(ख) मनुस्मृतिः – मनुस्मृतिः एकः प्रसिद्धः नीतिग्रन्थः धर्मग्रन्थः च अस्ति। अस्य रचनाकारः महर्षिः मनुः अस्ति। अस्मिन् ग्रन्थे द्वादश अध्यायाः सन्ति। अस्मिन् ग्रन्थे संसारस्य उत्पत्तिः, धर्मः, संस्कृतिः, मनुष्यस्य कर्तव्यानि इत्यादीनां वर्णनम् अस्ति।

(ग) पञ्चतन्त्रम् – पञ्चतन्त्रं कथाग्रन्थः अस्ति। अस्य रचनाकारः पण्डितः विष्णुशर्मा अस्ति। अस्मिन् पञ्च तन्त्राणि सन्ति। मित्रभेदः, मित्रलाभः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च।

(घ) हितोपदेशः – हितोपदेशस्य रचनाकारः नारायणपण्डितः अस्ति। अस्मिन् पशु-पक्षिणां कथाभिः बालानां कृते नीतिबोधः प्रस्तुतः अस्ति।

(ङ) रामायणम् – एषः ग्रन्थः भारतीयसंस्कृतेः आदर्शस्वरूपं दर्शयति। रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति। अस्मिन् ग्रन्थे भगवतः श्रीरामस्य चरितं वर्णितम् अस्ति। एषः ग्रन्थः आदिकाव्यम् इति नाम्ना प्रसिद्धः अस्ति।

(च) सुभाषितरत्नभाण्डागारः – अस्मिन् ग्रन्थे सुभाषितानां संग्रहः अस्ति। विविध-संस्कृतग्रन्थेभ्यः सुभाषितानि चित्वा अस्मिन् ग्रन्थे तेषां सङ्कलनं कृतम् अस्ति।



परियोजनाकार्यम्

१. पाठस्य सर्वाणि सुभाषितानि बृहत्-स्फोरकपत्रे सचित्रं लिखित्वा कक्षायाः भित्तौ स्थापयन्तु।

२. सुभाषितेषु प्रयुक्तानां क्रियापदानां सूचीं कुर्वन्तु। तेषाम् आधारेण वाक्यरचनां कुर्वन्तु।

३. विद्या, उद्यमः, अभिवादनशीलः इत्यादिगुणाः येषु सन्ति तादृशानां पञ्चानां महापुरुषाणां जीवनपरिचयं पठन्तु लिखन्तु च।

४. 'वसुधैव कुटुम्बकम्' इति विषये एकां भाषणप्रतियोगिताम् आयोजयन्तु।

© NCERT not to be republished

Reprint 2026-27